# आन्तर्जालिकानाम् अभिनवपाठ्यक्रमाणाम् उद्घाटनसमारोहः

09/09/2023



केन्द्रीयसंस्कृतविश्वविद्यालयस्य आन्तर्जालिकानाम् अभिनवपाठ्यक्रमाणां शुभारम्भकार्यक्रमः अद्य प्रातः (09/09/23) मुख्यालयस्य सारस्वतसभागारे समजनि। अस्मिन् कार्यक्रमे राष्ट्रियशैक्षिकप्रौद्योगिकमञ्चस्य अध्यक्षः आचार्यः अनिल डि. सहस्त्रबुद्धेवर्यः मुख्यातिथिरूपेण समागतः। विशिष्टातिथिरूपेण संस्कृतभारत्याः अखिलभारतसम्पर्कप्रमुखः श्री श्रीशदेवपूजारीवर्यः प्रत्यक्षम् उपस्थाय सर्वान् उदबोधयत्। कार्यक्रमस्य आध्यक्ष्यं विश्वविद्यालयस्य कुलपतिभिः आचार्यैः श्रीनिवासः वरखेडी वर्यैः निरूढम्।

मुक्तस्वाध्यायपीठपक्षतः दूरस्थशिक्षामाध्यमेन भाषा- व्याकरण - साहित्य - ज्योतिष - वास्तु - नैतिकादीनां विविधशिक्षणानाम् अवाप्तये ( 50 सङ्ख्याकानाम् ) अवसरः कल्पितः

वर्तते। एतेषु पाठ्यक्रमेषु नामाङ्कनार्थम् 09/09/2023 तः आरभ्य 30/09/2023 पर्यन्तं अवसरः प्रकल्पितोऽस्ति। अस्य पाठ्यक्रमस्य शुभारम्भं विधाय सहस्त्रबुद्धेवर्यः अवोचत् यत् **'बाल्ये संस्कृताध्ययनोत्सुकः आसम्। परन्तु संस्कृताध्ययनावसरः तदानीं मम विद्यालये महाविद्यालये च नासीत्। अधुना विश्वविद्यालयेन औपचारिकरूपेण अनौपचारिकरूपेण च अध्ययनाय मुक्तावसरः प्रकल्पितः वर्तते। एतदर्थं कुलपतिसहितान् मुक्तस्वाध्यायपीठस्य सर्वान् सदस्यान् अभिनन्दामि'** इति।

विशिष्टातिथिरूपेण समागतः श्री श्रीशदेवपूजारीवर्यः अगदत् यत् **'संस्कृतभाषायाः व्यापकप्रसाराय मुक्तस्वाध्यायपीठम् एकं प्रबलं साधनं वर्तते। गृहे उपविश्य एव अस्य साधनस्य सदुपयोगः सर्वैः कर्तुम् अधुना अवसरः वर्तते । अद्य भारतीयाः बहवः चार्वाकदेशं गन्तुम् उत्सहन्ते। परन्तु तद्देशजाः अत्र आगन्तुम् अत्रत्यम् अलौकिकज्ञानमवाप्तुं प्रयतन्ते। व्यसनमिदं समूलम् उत्पाटनीयम् अस्ति। अधुना दूरदर्शने धारावाहिन्याः स्थाने संस्कृतमूलजान् पुराणेतिहाससम्बद्धान् कार्यक्रमान् वैदेशिकाः अपि दिदृक्षन्ते। अतः तत्तादृशाः पाठ्यक्रमाः अपि निर्मातव्याः सन्ति'** इति। सन्दर्भेऽस्मिन् –

**अलब्धं चैव लिप्सेत लब्धं रक्षेदवेक्षया।**

**रक्षितं वर्धयेत् सम्यग् वृद्धं पात्रेषु निक्षिपेत् ॥**

इत्येनं मनुस्मृतेः श्लोकम् उदाहरत्।

अध्यक्ष्यभाषणे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभिः उक्तं यत् - "**बहुभ्यः वर्षेभ्यः प्रतीक्षितः मुक्तस्वाध्यायपीठस्य शैक्षिककार्यक्रमः अधुना पुनरपि समारब्ध इति आनन्दस्य विषयः। A++ इत्येषा विशिष्टा श्रेणी राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा प्रदत्ता**

**वर्तते। पुनः प्रथमवर्गीयः विश्वविद्यालयः इति विश्वविद्यालयानुदानायोगेनापि प्रत्यायितः विश्वविद्यालयः एषः। अनेन विश्वविद्यालयेन अधुना आरब्धाः अभिनवपाठ्यक्रमाः भारतदेशस्यैव अभिनवपाठ्यक्रमाः सन्ति। आधार कार्ड सदृशं कार्ड (पत्रम् ) अग्रिमेषु दिवसेषु सर्वेभ्यः छात्रेभ्यः उपलभ्यते। तस्मिन् पत्रे छात्रस्य सर्वविधं शैक्षिकवृत्तं निगूहितं भविष्यति। अस्य उपयोगं छात्रः यस्मिन् कस्मिन्नपि देशे सन्दर्भे च कर्तुं प्रभविष्यति। एवं नवाचाराः बहवो हि अस्माभिः आरब्धाः सन्ति। महता परिश्रमेण प्राप्ता A++ इत्येषा विशिष्टा श्रेणी संस्कृतशिक्षायाः मुक्तरूपेण प्रसाराय सहकारिणी वर्तते। अतः तन्महत्त्वं वयं जानीमः। विश्वविद्यालयेन इतोऽपि विशिष्टाः अभिनवपाठ्यक्रमाः समारभ्यन्ते। भारतीयाः सर्वे लाभान्विताः भवन्तु। Online माध्यमेन प्रसारिताः विद्याः सर्वेषां हस्तगताः स्थायिन्यश्च भविष्यन्ति इति मे दृढविश्वासः**”। सर्वेषां शुभं भवतु। अस्मिन् कार्यक्रमे डा। अरुणभट्टवर्यः वैदिकमङ्गलाचरणमकरोत्। प्रास्ताविकं प्रो। रत्नमोहनझावर्यः उपास्थापयत्। प्रो। मधुकेश्वरभट्टवर्यः धन्यवादान् समार्पयत्। श्रीमान् कू.वेङ्कटेशमूर्तिमहोदयः सुष्ठु सञ्चालनकार्यं निरवहत्।

शान्तिमन्त्रेण कार्यक्रमः सुसम्पन्नः।



प्रतिवेदननिर्माणम् -
डा। गणेश ति. पण्डितः
उपनिदेशकः, प्रकाशनानुभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
नवदेहली